इस युग में राजा प्रजा की रक्षा नहीं करेगा, अपितु कर ग्रहण के व्याज से धन का अपहरण करेगा । उस समय गज, अश्व एवं रथ से संपन्न व्यक्ति ही राजा होगा तथा शक्तिहीन व्यक्ति सेवक होगा । वैश्यगण कृषि, वाणिज्य आदि अपने कर्मों का त्याग करके शिल्पकारी आदि से जीविका निर्वाह करते हुए शूद्र वृत्तियों में ही लीन रहेंगे । आश्रम आदि के चिन्हों से रहित अधम मनुष्य संन्यास ले कर भिक्षावृत्ति में तत्पर रहेंगे एवं लोगों से सम्मानित होकर पाखंड वृत्ति का आश्रय लेंगे । प्रजाजन दुर्भिक्ष एवं कर पीड़ा से अत्यंत उपद्रव युक्त तथा दु:खी होकर गेहूं एवं जौ के आधिक्य वाले देशों में निवास करेंगी ।

इस युग में वेद मार्ग का लोप, मनुष्यों में पाखंड की प्रचुरता तथा अधर्म की वृद्धि हो जाने से प्रजा की अल्पायु होगी । लोगों के शास्त्र विरुद्ध तपस्या करने से तथा राजा के दोष से प्रजा की बाल्यावस्था में मृत्यु होने लगेगी । बारह वर्ष की अवस्था में ही लोग पलित केश हो जाएंगे । कोई भी व्यक्ति बीस वर्ष से अधिक जीवित नहीं रहेगा । इस समय लोग मंदबुद्धि, व्यर्थ चिन्ह धारण करने वाले तथा दुष्ट चित्त होंगे, अतः एव वे अल्पकाल में ही विनष्ट हो जाएंगे।

कलयुग में वृष्टि अल्प जलवाली होंगी, कृषि अल्प उपज वाली तथा फल आदि अल्पसार वाले होंगे । अधिकांश शमी के वृक्ष होंगे तथा चारों वर्ण शूद्रवत् हो जाएंगे । अजा का ही प्रायः दूध प्राप्त होगा तथा उशीर ही एकमात्र अनुलेप होगा । सास और ससुर ही लोगों के गुरुजन होंगे । उस समय अल्प बुद्धि पुरुष पुनः वाणी, मन तथा शरीर आदि दोषों के वशीभूत होकर प्रतिदिन पुनः पुनः पाप कर्म करेंगे । शक्ति, शौच तथा लज्जा रहित पुरुष को समस्त संभव दु:ख उपस्थित होंगे । उस समय संसार के स्वाध्याय तथा वषटकार रहित हो जाने से कहीं कहीं ही कुछ धर्म अवशिष्ट रहेगा । कलयुग की यह विशेषता होंगी कि इस युग में अल्प प्रयत्न से प्राप्त होने वाली पुण्य राशि सतयुग में महान तपस्या से प्राप्त की जा सकती है । जो फल सतयुग में 10 वर्ष तपस्या, ब्रह्मचर्य आदि करने से प्राप्त होता है उसे मनुष्य त्रेता में एक वर्ष में, द्वापर में एक मास में तथा कलयुग में केवल 1 दिन रात में प्राप्त कर लेता है । जो फल सतयुग में ध्यान, त्रेता में यज्ञ

तथा द्वापर में देवार्चन करने से प्राप्त होता है वही कलयुग में श्रीकृष्ण का नाम कीर्तन से प्राप्त होता है।[१२] कलयुग में अति अल्प जनों को ही महान धर्म की प्राप्ति हो जाती है। इस प्रकार विष्णुपुराण में चारों युगों के वर्णन के संदर्भ में सतयुग, त्रेता, द्वापर का उल्लेख मात्र है अपितु कलयुग का ही वर्णन अधिक प्राप्त होता है। कलयुग के जनों की वृत्तियां एवं धर्म या कर्तव्य आदि का वर्णन विस्तार पूर्वक उपलब्ध होता है।

**सन्दर्भ सूचि:**

१. ब्रह्मणा क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तमः।

पदोरुवक्षः स्थलतो मुखतश्च समुद्गताः ।। - विष्णुपुराणम् - १.६.६

२. संसिद्धायां तु वर्तायां प्रजाः सृष्ट्वा प्रजापतिः ।

मर्यादां स्थापयामास यथास्थानं यथागुणम् ।।

वर्णानामाश्रमाणां धर्मान्धिर्मभृतां वर ।

लोकाश्च सर्ववर्णानां सम्यग्धर्मानुपालिनाम् । -तत्रैव -१.६. ३२,३३

३. वर्णाश्रमाचारवता पुरुषेण परः पुमान्।

विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः।।

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च पृथ्वीपते ।

स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ।। -तत्रैव - ३.८.९,१२

४. सर्वभूतहितं कुर्यान्नाहितं कस्यचिद् द्विजः।

मैत्री समस्त भूतेषु ब्राह्मणस्योत्तमं धनम्।। - तत्रैव -३.८.२४

५. पशुपाल्यं च वाणिज्यं कृषिं च मनुजेश्वर ।

वैश्याय जीविका ब्रह्मा ददौ लोकपितामहः ।। -तत्रैव - ३.८.३१

६. तस्याप्यधयनं यज्ञो धर्मश्च शस्यते।

नित्यनैमित्तिकादिनामनुष्ठानं च कर्मणाम्।। -तत्रैव - ३.८.३२

७. द्विजातिसंश्रितं कर्म तदर्थ्य तेन पोषणम्।

क्रयविक्रयजैर्वापि धनैः कारुद्भवेन वा ।। -तत्रैव - ३.८.३२

८. क्षात्रं कर्म द्विजस्योक्तं वैश्यं कर्मं तथाऽपदि ।

राजन्यस्य च वैश्योक्तं शूद्रकर्म न चैतयोः।। -तत्रैव -३.९.३९

९. अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।

दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति।। -तत्रैव -३.९.१५

१०. प्रायश्चित्तान्याशेशाणि तपः कर्मात्मकानि वै।

यानि तेषामशेषाणां कृष्णानुस्मरणम्परम्।। -तत्रैव -२.६.३९

११. नक्षत्रपीडासु दुष्टस्वप्नावलोकने ।

इच्छा श्रद्धानि कुर्वीत नगरस्यागमे तथा।। -तत्रैव - ३.१४.६

१२. यत्कृते दशभिर्वर्षैः त्रेतायां हायनेन तु ।

द्वापरे तच्च मासेन ह्यहोरात्रेण तत् कलौ॥

ध्यायन् कृते यजन् यज्ञैः त्रेतायां द्वापरेऽर्चयन्।

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्॥ -तत्रैव - ६.२.१५,१७

# શિક્ષણની કેટલીક તરાહોનો આધુનિક પરિપ્રેક્ષ્ય

ડૉ. પ્રીતેશ એસ. રાઠોડ
આસિસ્ટન્ટપ્રોફેસર, ઈતિહાસ
શ્રીસી. એચ. ભીલ સરકારી વિનયન અને વાણિજ્ય કોલેજ, નસવાડી

આજના સતત બદલાતા સમયમાં શિક્ષણ કેવી રીતે આપવું તે અંગે શિક્ષણકારો સેમિનાર અને વર્કશૉપ કરતા રહે છે. શિક્ષક પણ વિદ્યાર્થી મહત્તમ શીખી શકે તેવી પદ્ધતિ માટે વિચારશીલ બન્યો છે. હવે, વ્યાખ્યાન પદ્ધતિ સિવાયની પદ્ધતિ દ્વારા શિક્ષણ આપવાથી શી ફલશ્રુતિ મળશે તે અંગે સંશોધનો થતા જાય છે. કઈ પદ્ધતિ કયા વિષયવસ્તુ માટે યોગ્ય છે તેનો નિર્ણય તો સ્વયં શિક્ષકે જ કરવો રહ્યો.

શિક્ષણ માટેની પધ્ધતિની સામાન્ય વ્યાખ્યા એવી છે કે જે તે વિષયવસ્તુને વર્ગખંડમાં રસપ્રદ રીતે રજૂ કરવાની ઢબ. પણ જ્યારે વિદ્યાર્થી જાતે જ શીખતો થાય ત્યારે તેની વ્યાખ્યા બદલવી પડે. કારણકે વિદ્યાર્થી માત્ર વર્ગખંડમાં જ શીખતો નથી. પણ કૌટુંબિક વાતાવરણ, સામાજિક વાતાવરણ, મિત્રવર્તુળ કે અન્ય સ્થાનોમાંથી પણ શીખે છે.

શિક્ષણની વિવિધ તાલીમો લઈ વર્ગખંડમાં હાજર થનાર શિક્ષક અને સામે કહેવાતું શિક્ષણ લેવા બેઠેલા વિદ્યાર્થી, આજે આ બંને નિષ્ફળતાના ભયથી પીડિત હોય તેમ દેખાય છે. ત્રીજી બાજુ દરેક વાલી એમજ ઇચ્છે છે કે પોતાનું બાળક જ બધાની આગળ રહે. શૈક્ષણિક સંસ્થાઓની તથા મા-બાપની મહત્ત્વાકાંક્ષાઓ પણ બાળક ઉપર ઠોકી બેસાડાય છે અને મુજબ બાળકને તૈયાર કરવા પરિશ્રમ કરાય છે. બાળકને મોટાભાગનું દબાણથી કે પરાણે શીખવવામાં આવી રહ્યું હોય ત્યારે શીખવવાની તમામે-તમામ પદ્ધતિઓ કશુંજ પરિણામ આપી શકે નહીં.

અનુભવને આધારે શીખવાનો સિધ્ધાંત એ શીખવાની પ્રક્રિયાની ઉત્ક્રાંતિનું મોડેલ આપે છે. તેમાં વિદ્યાર્થી કેવી રીતે શીખે છે, વૃદ્ધિ કરે છે અને વિકાસ પામે છે તે મહત્ત્વ ધરાવે છે. શીખવાની પ્રક્રિયામાં અનુભવની મુખ્ય ભૂમિકાને ભાર આપવા માટેના આ સિધ્ધાંતને "અનુભવને આધારે શીખવાનો સિધ્ધાંત"કહે છે. અનુભવ ઉપર જે ભાર મૂકવામાં આવે છે એ બીજા સિધ્ધાંતોથી અલગ પાડે છે. સ્વાનુભવ માટેનું વાતાવરણ પૂરું પાડવું એજ ઉત્તમ શૈક્ષણિક પદ્ધતિ. ચાલો કેટલીક શિક્ષણ પદ્ધતિઓ પર દ્રષ્ટિપાત કરીએ.

1.પ્રોજેક્ટ : વિદ્યાર્થીઓ પોતાના અભ્યાસ માટે ચોક્કસ વિગતો એકઠી કરે અને તે વિગતો દ્વારા સર્વસામાન્ય નિયમ શોધી કાઢે. અહીં વ્યક્તિગત તફાવતોને ખીલવાની તકો મળે છે. શોખ, રસ, જિજ્ઞાસા, ઉત્સાહનો અવકાશ પૂરી શકાય છે. સારી ટેવોનું ઘડતર થાય છે.

2. પ્રદર્શન : વિષય આધારિત જુદાંજુદાં પ્રદર્શનો યોજી શકાય, જેમકે વિશિષ્ટ દિવસો, કૃષિપાકો, વ્યક્તિ વિષયક. એકસાથે ઘણુંબધું જ્ઞાન પ્રદર્શનોથી આપી શકાય છે.

3.નાટ્યીકરણ : વિદ્યાર્થીઓની સામેલગીરી માટેની ઉત્તમ પધ્ધતિ. જેમાં જોડાનારા વિદ્યાર્થીઓ અને જોનારા વિદ્યાર્થીઓ બધામાં તકો આપવામાં આવે. રસ જાગૃત કરી શકાય છે. જ્ઞાન સાથે ગમ્મત મળે છે.

4.પૅનલચર્ચા : વિદ્યાર્થીઓમાંથી જ બે-ચાર જણા કોઈ વિષયે પોતાના વિચારોની ચર્ચા કરે. ચર્ચા બાદ અન્યોને પણ પોતાના અનુભવો રજૂ કરવાની તક આપવામાં આવે.

5.આગમન-નિગમન યુક્ત અધ્યાપનઃ ઉદાહરણ પછી ખ્યાલ કે ખ્યાલ પછી ઉદાહરણ એ બંને રીતે શિક્ષણકાર્યની સ્પષ્ટતા સાથે વિષયવસ્તુનો વિકાસ વધારતા રહેવું.

6.જ્ઞાન ગોષ્ઠિ આધારિત અધ્યાપન : નિષ્ણાતોને બોલાવીને સામાજિક પ્રશ્નો, નીતિઓ, જરૂરિયાતો, પર્યાવરણીય બાબતો, ધાર્મિક દૃષ્ટિકોણો વિશે વિદ્યાર્થીઓને વાકેફ કરવા.

7.ભેદબોધ પધ્ધતિ : વિદ્યાર્થીઓ ગોખપટ્ટી ન કરે, પણ ખરા અર્થમાં સમજે એ માટે સંશ્લેષણ કે વિશ્લેષણ આધારિત પધ્ધતિ જેમાં વિદ્યાર્થી કંઈક તાર વણી કરી શકે.

8.સત્યશોધપધ્ધતિ : વાસ્તવિદુનિયાનજરૂરિયાતો, મૂલ્યો, રાષ્ટ્રીય-આંતરરાષ્ટ્રીસમજ, પર્યાવરણીય જાળવણીના ખ્યાલો વિકસે એવી નક્કર સત્ય આધારિત બાબતો વિષયવસ્તુ સાથે વર્ણવવી.

9. ક્રિયા દ્વારા શિક્ષણ : માત્ર સૈધ્ધાંતિક જ્ઞાન જ કે પુસ્તકિયું જ નહીં, પણ કાર્યાનુભાવ આપવો.

10.નિરીક્ષિત અભ્યાસ આયોજનઃ શિક્ષક પોતાની નજર સામે જ એવી સ્વઅધ્યયન પધ્ધતિ વિકસાવે કે જેથી શિક્ષકની રાહબરી હેઠળ વિદ્યાર્થીઓ જાતે શીખે.

11.ઉપકરણો આધારિત અધ્યાપન : માત્ર કથન નહીં, પણ તેની સ્પષ્ટતા માટે સાધનો જેવાં કે ચાર્ટ, ચિત્ર, નકશા, ફિલ્મસ્ટ્રીપ, ઑવરહેડ પ્રૉજેક્ટર, ટી.વી. કમ્પ્યૂટર એવાં અનેક સાધનો આધારે શિક્ષણકાર્ય.

12.પ્રયોગ આધારિત અધ્યાપનઃ શિક્ષક વર્ગખંડમાં જ જે તે બાબતની સાબિતી આપી શકે. તેવી ઢબ એ પ્રયોગ આધારિત શિક્ષણ. માત્ર ગાન નહીં પણ પોતે ગાઈને બતાવે એ પણ પ્રયોગ જ ગણાય. સંકુચિત અર્થમાં વિજ્ઞાન વિષયમાં પણ આવા પ્રયોગ થાય છે.

13.જૂથચર્ચા : રોજિંદા પ્રશ્નો કે જીવનના કેટલાંક વણ ઉકેલ્યા કોયડાઓની ચર્ચા માટે જૂથો પાડવામાં આવે. આવા જૂથોને વિષય ઉપર ચર્ચા કરવા દેવા સમય આપ્યા બાદ અરસ પરસ વિચારોની આપ-લેક રાવવી.

14.આધાર સાથે રજૂઆત : અધ્યયન વસ્તુની વાસ્તવિક રજૂઆત કરવી, એટલે કે અસલ બાબતો (વસ્તુઓ) ને વર્ગ સમક્ષ લાવવી.

15. સમસ્યા ઉકેલઃ વિદ્યાર્થીઓ સમક્ષ કોઈ કોયડો કે સમસ્યા મૂકી તેઓ તેનો ઉકેલ શી-શી રીતે મેળવે છે. તેમાંથી શું માન્ય છે ? કે કયો ઉકેલ ઝડપી અને ન્યાય સંગત છે. તેના આધારે વિદ્યાર્થીઓની ચકાસણી કરવી.

16.પ્રવાસ-પર્યટનનું આયોજનઃ વિદ્યાર્થીઓને વર્ગખંડની બહાર કાઢી, વાસ્તવિક દુનિયામાં હાથપગ આધારિત શિક્ષણ આપવું, નૈતૃત્વ શક્તિનો વિકાસ આ પ્રકારે કરી શકાય.

17.નિદર્શન યુક્ત શિક્ષણ : જે વાત કથનથી સ્પષ્ટ ન થાય. તે જોવાથી તરત સ્પષ્ટ થઈ જાય. શિક્ષક મોટા સમૂહ સમક્ષ આવી પ્રક્રિયા કરી બતાવે છે.

18.અનુભવ આધારિત શિક્ષણ ધ્યેય નક્કી કરવાથી માંડીને પ્રયોગનું નિરીક્ષણ, મૂલ્યાંકન અને છેવટે આયોજન સુધીના આખા શિક્ષણના ચક્રને કામે લગાડે છે. આ આખી પ્રક્રિયા દ્વારા વ્યક્તિ નવા કૌશલ્ય, નવા વલણો અથવા વિચારવાના એકદમ નવા રસ્તાઓ પણ શીખે છે.

19.વર્કશોપ(ક્ષેત્રકાર્ય)નું આયોજનઃ વિદ્યાર્થીઓ કાર્ય કરે તે માટેનું ચોક્કસ આયોજન. જેમાં બુધ્ધિના ઉત્ખનન કરી શકાય તેવી કોઈપણ બાબત નક્કી કરી. તેઓ પોતાનું ક્ષેત્ર કાર્ય કરે છે.

20.પુનરાવહન :કોઈપણ પધ્ધતિથી શીખવવામાં આવ્યું હોય તેનું પુનરાવહન કરવાનું વ્યક્તિને કહેવામાં આવે છે. કુલ શિક્ષણ સામાગ્રીમાંથી વ્યક્તિને જેટલું યાદ રહ્યું હોય તેનું તે પુનરાવહન કરે છે. દા.ત. વિદ્યાર્થીને દસ લીટીની એક કવિતામાંથી જો આઠ લીટી આવડે તો તેણે ૮૦ ટકા શિક્ષણ મેળવ્યું કહેવાય. એટલે કે શીખેલી બાબતો સફળતાપૂર્વક ૮૦ ટકા ધારણ થઈ શકી છે એમ કહેવાય. પુનરાવહન ખૂબ અઘરૂં છે કારણ કે પુનરાવહનમાં શીખેલી બાબતોને યાદ કરવાનો કોઈ જ સંકેત મળતો નથી.વિદ્યાર્થીને આપણે રોબો બનાવવાનો નથી.

આપણે એને જીવંત માનવ બનાવવાનો છે અને તે માટે સંપૂર્ણ સર્વશ્રેષ્ઠ શિક્ષક વિના તો કેવી રીતે ચાલશે ? ફક્ત બોર્ડ ભર-ભરીને લખાવ્યા કરીશું, પાંચ-દસ વખત પેપરો લખાવ્યા કરીશું, ગોખણપટ્ટી કરાવી શું એ ભણતર નથી. વિદ્યાર્થીમાં Independent thinking અને Free Expression ની ક્ષમતા જો ન કેળવાય તો એ શિક્ષણજન કામું છે. જીજ્ઞાસા જાગૃત ન થાય તો એ ભણતર ભણતર જ નથી. ડૉ. સર્વ પલ્લી રાધાકૃષ્ણ ને કહ્યું છે કે 'Don't cripple down the sponteneity of the child' આજની શિક્ષણ પદ્ધતિ શું કરી રહી છે !!!!

# ।। साहित्यदर्पणोक्तरीत्या काव्यप्रयोजनविवरणम् ।।

**बारीआ रोनकः भारतसिंहः**

ननु **'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'**इति न्यायादस्य ग्रन्थस्य यावत् प्रयोजनं न निगद्यते तावत् कथमत्र सुधियां प्रवृत्तिरित्यत आह - **अस्य ग्रन्थस्येति** । अस्य आरम्भमाणस्य ग्रन्थस्य साहित्यदर्पणस्य काव्याङ्गतया काव्यस्य रघुवंशादे अङ्गतया अप्रधानकारणतया काव्यफलैः काव्यस्य अङ्गिभूतस्य कविकर्मणः फलैः साध्यैः चतुर्वर्गादिरूपैः एव फलत्त्वं फलसहितत्वम् इति अस्मात्कारणात् काव्यफलानि काव्यस्य अङ्गिभूतस्य कविकर्मणः फलानि कार्याणि आह निगदति - **चतुर्वर्गेति** ।

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।**

**काव्यादेव यतस्तेन तत्स्वरूपं निरूपयते ।।**[i]

चतुर्वर्गफलप्राप्तिर्हि काव्यतो 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव । उक्तश्च (भामहेन) -

अत्र प्राचीनाचार्याणां भामहादीनां सम्मतिमुदाहरति - उक्तञ्च

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।**

**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।**[ii]

यस्मात् कारणात् अल्पबुद्धीनामपि न केवलं महाधियामित्यर्थः सुखात् अनायासात् काव्यात् रघुवंशादेः कविकर्मण एव, चतुर्वर्गफलप्राप्तिःचतुर्वर्गस्य धमाऽर्थकाममोक्षरूपस्य फलस्य परिणामस्य प्राप्तिः प्रापणं भवतीति शेषः तेन कारणेन तत्स्वरूपं तल्लक्षणं निरूप्यते प्रतिपाद्यते ।

कारिकां विवृणोति चतुर्वर्गफलप्राप्तिः धर्माऽर्थकाममोक्षरूपफलप्रापणं काव्यातः रघुवंशादेः कविकर्मणः रामादिवत् रामादिना तुल्यं प्रवर्तितव्यं चेष्टनीयं गुरुजनादेशानुपालनसज्जनसंरक्षणदुष्टनिबर्हणरूपा प्रवृत्तिः करणीयेति यावत् न रावणादिवत् रावणादिनां तुल्यं प्रवर्तितव्यं चेष्टनीयम्, परनार्यपहरणसज्जनसंहरणदुष्टप्रचोदनादिरूपा प्रवृत्तिर्न करणीयेत्यर्थः, इत्यादिना कृत्येषु कर्तव्येषु प्रवृत्तिः प्रवर्तनम् अकृत्येषु अकरणीयेषु

निवृत्तिः निवर्त्तनं तदुपदेशद्वारेण तदुपदेशव्यापारेण सुप्रतीता सुविदिता एव । इत्यनेन प्रकारेण काव्यस्य शास्त्रत्वं निदर्शितम् । यदाहुः -

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।**

**पुंसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते ।।**

अथ काव्यस्य फलं दर्शयन् तत्स्वरूपनिरूपणं प्रतिजानीते ।

राजानककुन्तकोऽपि व्यक्तिविवेकेऽमुमेवार्थमाह, यथा -

**'धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।**

**काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ।।**[iii]

अस्यार्थस्तु अभिजाताः खलु राजपुत्रादये । धर्म्मादयुपेयार्थिनो विजिगीषव क्लेशभीरवश्च सुकुमाराशयत्वात् तेषा धर्म्मादिसाधनोपायः धर्म्मादेरुपेयभूतस्य चतुर्वर्गस्य साधने सम्पादने नदुपदेशरूपत्वादुपायस्तत्प्राप्तिनिमित्तं काव्यबन्ध इति।

काव्यस्य चतुर्वर्गसाधनत्वं युक्त्या प्रतिपादयति । रामादिवत् चतुर्वर्गकामेन रामादिनेव, प्रवर्तितव्यं पित्राज्ञापालनादाधित्यर्थः । रावणादिवत् रावणादिनेव न प्रवर्त्तितव्यं परदारहरणादावित्यर्थः इत्यादि कृत्यं विहितकर्म्माकृत्यं निपिद्धं कर्म्म तयाः प्रवृत्तिनिवृत्ती यत्नशेषो तयोरूपदेशस्तजनकं ज्ञानं स एव द्वारं व्यापारस्तेन सुप्रतीतैव अतिप्रसिद्धैवेति शब्दमात्रार्थः । तथा हि यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादिवेदवाक्यदग्निहोत्रादिविहितकर्म्मण कर्त्तव्यताज्ञानात् पुरुषस्य प्रवृत्तेः कर्म्मानुष्ठानेन धर्म्मादिर्भवति, तथा रामायणादिमहाकाव्यात् पितृवाक्यपालनादिलक्षणतत्तद्विहितकर्म्मणि कर्त्तव्यज्ञानेन प्रवृत्त्या तदनुष्ठानेन धर्म्म उपजायते नस्मादर्थकामौ तद्धर्म्मफलानुसन्धानाञ्च मोक्ष इति काव्यचतुर्वर्गफलप्राप्तिर्गवतीति भावः ।

**उक्तञ्च-**

**किञ्च काव्यद्धर्मप्राप्तिर्भगन्नारायणचरणारविन्दस्तवादिना, 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव । अर्थप्राप्तिस्च प्रत्यक्षसिद्धा । कामप्राप्तिश्चार्थद्वारैव । मोक्षप्राप्तिश्चैतज्जन्मधर्मफलाननुसन्धानात् मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च ।**[iv]

साधुकाव्यनिषेवणं साधु सत् यत् काव्यं कविकर्म तस्य निषेवणं परिशीलनं करणञ्च धर्मार्थाकाममोक्षेषु धर्मः सुकृतं अर्थः द्रव्याप्तिः कामः अभिलाषः 'कामोऽभिलाषः तर्षश्च' इत्यमरः, मोक्ष मुक्तिः एतेषु चतुर्विधेषु पुरुषार्थेषु कलासु नृत्यगीतादिचतुःषष्टिभेदासु च तथा वैचक्षण्यं निपुणत्वं कीर्तिं समज्ञां 'यशः कीर्तिः समज्ञा च' इत्यमरः, सत्काव्यपरिशीलनकरणजनितमिति यावत् च तथा प्रीतिं अनुरागं करोति विदधाति । पद्यमिदमाचार्यस्य प्राच्यस्य भामहस्य ज्ञेयम् । अत्रानुष्टुब्बृतम् ।

उक्तमेवार्थं विवृणोति विश्वनाथः काव्यात् कविकर्मणः धर्मप्राप्तिः सुकृतावाप्तिः भगवान्नारायणस्य परमात्मनः चरणारविन्दस्तवादिना पादकमलस्तोत्रादिना सम्यगज्ञातः व्युत्पत्तिपूर्वकं ज्ञानविषयीकृतः सन् स्वर्गे परलोके इहि जगति तथा कामधउक् कामान् तर्षान् दोग्धि इति, इच्छापूरक इत्यर्थः भवति वर्तते इत्यादिवेद वाक्येभ्यः भाष्यकाराद्युद्धृतश्रुतिवाक्येभ्यः च सुप्रसिद्धैवसुविदितै व । अर्थप्राप्तिः धनावाप्तिभीष्टप्राप्तिश्च काव्यादिति शेषः । प्रत्यक्षसिद्धा इन्द्रियगोचरगता श्रीहर्षादेर्धावकबाणभट्टादीनामर्थावाप्तिरिवेत्यर्थः । प्रयोजनसिद्धिश्च सूर्यशतकादिनिर्माणेन मयूरादीनां कुष्ठादिरोगनिवृत्त्या स्वास्थ्यलाभरूपेत्यर्थः । कामप्राप्तिः विषयभोगावाप्तिः च अर्थद्वारैव धनागमैरेव । मोक्षप्राप्तिः कैवल्यावाप्तिः च एतज्जन्यधर्मफलाननुसन्धानात्एतज्जन्यः सत्काव्यनिषेवणोद्भूतः यो धर्म सुकृतं तत्फलस्य तत्परिणामस्य अनुसन्धानात् अनपेक्षणात् निष्कामकर्माश्रयणादित्यर्थः मोक्षोपयोगिवाक्ये श्रुत्युपनिषदादिस्थशब्दसमूहे व्युत्पत्त्याधायकत्वात् विशिष्टज्ञानसाधकत्वात् तथा ।

### ❖काव्यात् धर्मप्राप्तिः

साधु सम्यक् काव्यस्य निषेवणं करणं मननं ज्ञानञ्च कर्त्तृ, केचित्तु - साध्विति काव्येत्येतस्य विशेषणम्, काव्ये साधुत्वञ्च - दोषशून्यत्वे सति गुणालङ्करशालित्वे सति वाक्यविशेषस्य रससमनुगृहीतत्वम्, तद्विरहोऽसाधुत्वम्, तदुक्तं भोजेन - "निर्दोषं गुणवत्काव्यम्" इत्यादि । तथा च साधु यत् काव्यं तस्य निपेवणमित्यर्थ इति वदन्ति । धर्म्मार्थकाममोक्षेषु तदुपायभूतेषु, वैचक्षण्यं विशिष्टज्ञानं, कलासु नृत्यगीतादिचतुःषष्ठिप्रकारासु विद्यासु च वैचक्षण्यं दर्शनश्रवणादिना विलक्षणज्ञानं, कीर्तिं कालिदासादेरिव यशः, प्रीतिं परामानन्दञ्च करोति । तथा च साधुकाव्यनिषेवणकर्तृको धर्म्मार्थकाममोक्षकलाविषयवैलक्षण्याधायकः कीर्त्तिप्रीत्युत्यादानहेतुभूतश्च बोधानुकूलो व्यापारः सम्पद्यत इति वाक्यार्थबोधः ।

काव्यं कर्त्तव्यत्वाकर्त्तव्यत्वज्ञानद्वारा कृत्याकृत्यप्रवृत्तिनिवृत्ती प्रति कारणमस्तु चतुर्वर्गं प्रति तु अन्यथासिद्धमेवेत्याशङ्कायां तस्य साक्षादेव धर्म्मादि प्रति कारणत्वमुपपादयितुमाह ।

काव्यादित्यस्य प्राप्त्यन्तपदचतुष्टयेऽन्वयः । स्तवो गुणज्ञापनम् । आदिना रामकृष्णादेर्जन्मोत्सवादिज्ञापनम्, तच्छ्रवणं वेत्यर्थः ।

काव्ये स्तवादेरभावदर्शनात्तेपां निष्फलत्वं स्यादित्या शङ्क्याह एक इति । अयमर्थः येन पुरुषेण सोऽपि शब्द सम्यक् नाद्रूप्येण ज्ञातो वाः स प्रयोक्ता स च ज्ञाता स्वर्गे परलोके लोकेऽस्मिल्लोकेच कामधुग्भीष्टफलभाग्भवति सम्पद्यते । इत्यादि वेदवाक्येभ्यः काव्याद्धर्म्मप्राप्ति सुप्रसिद्धैवेत्यनुपङ्गः । तथा च तादृशकाव्यस्य व्याकरणविरोधेन रसवत्तया रसवत्तया व प्रयुक्ततया तादृूप्येण जेयत्वेन च कृतिज्ञप्त्योरन्यतरस्य धर्म्मफलत्वं श्रौतमिति भाव ।

### ❖काव्यात् अर्थप्राप्तिः

काव्यादित्यनुपज्यते । प्रत्यक्षसिद्धेति । श्रीहर्षादेधावकादीनामिव धनप्राप्तिः लोके प्रसिद्धैवेत्यर्थः । यदुक्तं मम्मटेन **"श्रीहर्षादेधावकादीनामिव धनम्"**[v] इति । धावकनामा कविः श्रीहर्षनृपनाम्ना रत्नावलीनाम्नी नाटिकां कृत्वा बहुधनं लब्धानित्युद्योतादौ स्पष्टम् ।

### ❖काव्यात् कामप्राप्तिः

काव्यादित्यनुषज्यते । कामो विषयभोगः, विषयः स्त्रक्चन्दवनितादिः, तस्य प्राप्तिरर्थद्वारैव, अर्थेन स्त्रगादीना सम्भवान्, तथोक्तम् - **"धर्म्मादर्थस्ततः कामः कामात्सुखसमुन्नतिः"** इति । अत्र कामप्राप्तावर्थस्य व्यापारत्वात्काव्यं नान्यथासिद्धं "व्यापारेण व्यापारिणो नान्यथसिद्धि" रिति नियमात् । इति बोध्यम् ।

### ❖काव्यात् मोक्षप्राप्तिः

काव्यादिति योज्यम् । एतज्जन्यस्य काव्यजन्यस्य धर्म्मस्य यत् फलं स्वर्गादि तस्याननुसन्धानात् श्रवणादिकाले पुरुषस्याभिलाषविरहात् । न खलु कोऽपि पुरुषः खर्गाद्युद्देशेन काव्यं करोति श्रृणोति वा । एवञ्च निष्कामेण सम्पद्यमानो धर्म्मो मोक्षायैव भवति । यदुक्तं भगवता - **"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।।"**इति । धर्म्मफलस्याननुसन्धानादेव तदधीनोत्पत्तिकयोर्थकामयोरुत्यत्तिसम्भावनैव नास्तीति तयोरनुपादानम् । यद्वा - धर्म्मप्रधानं फलं धर्म्मफलं, तेनार्थकामयोरपि संग्रहः, तस्याननुसन्धानात् अपारमार्थिकत्वेन साध्यत्वानिर्धारणात् मोक्षप्राप्तिर्भवतीति योजना ।

**उक्तञ्च -**

**चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धिनामेव जायते । परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धिनामपि पुनः काव्यादेव ।**

**ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात् ?**[vi]

यद्यपि काव्यप्रकाशे आचार्यमम्मटेन -

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**

**सद्यः परनिर्वृतये कान्तासम्मितयोपदेशयुजे ।।**[vii]

इत्यादिना काव्यस्य षड् विधं प्रयोजनं प्रदर्शितम्, परन्तु अत्राचार्यविश्वनाथेन संक्षेपतो काव्यस्यानुबन्धचतुष्टयं प्रदर्शितम् ।

अत्र च शब्दार्थकाव्यलक्षणरसध्वन्यलङ्कारगुणदोषादयो विषयाः, तैः सहास्य दर्पणग्रन्थस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धः, चतुर्वर्गफलप्राप्तिरूपोऽर्थः प्रयोजनमित्यर्थः, अधीतकाव्य कोशादिरनधीताऽलङ्कारशास्त्रो जनोऽधिकारीति अनुबन्धा निदर्शिता इति बोध्यम् ।

---

[i] साहित्यदर्पणे परिच्छेदः १ , श्लो. २ ।
[ii] काव्यालङ्कारे परिच्छेदः १ , का. २ ।
[iii] व्यक्तिविवेके आननम् १ ।
[iv] साहित्यदर्पणे परिच्छेदः १ ।
[v] काव्यप्रकाशे उल्लासः १ ।
[vi] साहित्यदर्पणे परिच्छेदः १ ।
[vii] काव्यप्रकाशे उल्लासः १ , का. २ ।

# ||काव्यप्रकाशोक्तरीत्याअभिधामूलाव्यञ्जनाशक्तिनिरूपणम्||

**परमार किरणकुमारः रमेशभाई,**
**शोधच्छात्रः**

**❖शाब्दीमूला व्यञ्जनानिरूपणम् -**

**अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ।**[1]

**अभिधामूलामाह -**

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।**

**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया ।।**[2]

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।**

**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।।**[3]

मम्मटाचार्यः स्वकाव्यप्रकाशनामके ग्रन्थे व्यञ्जनां साधितवान् । सम्प्रति व्यञ्जनां - अभिधामूलाव्यञ्जनां च विस्तरेण वर्णयति ।

सङ्क्षेपेण वक्तुं शक्यते यत् उत्तमकाव्यरूपस्य ध्वनिकाव्यस्य मूले या व्यञ्जना निहिता तस्याः वर्णनं करिष्यति ग्रन्थकारः । अभिधामूलाव्यञ्जनां सोदाहरणं ज्ञापयति ।

**अभिधामूलाव्यञ्जना -**

व्यञ्जनायाः विभागद्वयम् - शाब्दी व्यञ्जना, आर्थी व्यञ्जना च । शाब्दीव्यञ्जनायाः आद्यभेदः अभिधामूलाव्यञ्जना अस्ति । अभिधामूलाव्यञ्जनायाः विवरणं दातुं आचार्यमम्मटः कथयति -

**उक्तञ्च काव्यप्रकाशे -**

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।**

---

[1]साहित्यदर्पणे - प.२, श्लो.१३ ।

[2]साहित्यदर्पणे - प.२, श्लो. १४ ।

[3]काव्यप्रकाशे - उ.२, का.१९ ।

**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।।**[4]

अनेके अर्थाः (वाच्यत्वेन) यस्य तस्य अनेकार्थस्य, अनेकत्र गृहीतशक्तिकस्य शब्दस्य वाचकत्वे, अभिधायां संयोगाद्यैः संयोगादिभिः नियन्त्रिते प्रतिबद्धे सति, एकत्र नियमिते सति आवाच्यार्थः तदाभिधया प्रतिपादयितुम् अशक्यः । तत् प्रतीतिहेतुः या व्याप्ततिः व्यापारः, सा अञ्जनं व्यञ्जनमेव इत्यर्थः । इयं हि अभिधामूला शाब्दी व्यञ्जना इत्युच्यते ।

अनेकार्थस्य - अनेकत्र गृहीतशक्तिकस्य शब्दस्य

वाचकत्वे - अभिधायाम्

संयोगाद्यैः - व्यङ्ग्यार्थप्रतीतिकृत्

या व्यापृतिः - व्यापारः

अयं भावः - वर्णसमूहरूपस्य पदस्य यदि एकोऽर्थो भवति तदा तदर्थरूपिता एका एव शक्तिः पदे भवति । तत्र शक्य - वाच्यार्थ, निष्ठस्य शक्यतावच्छेदकधर्मस्य एकत्वात् । यथा - गङ्गा पदस्य प्रवाहरूपो एकोऽर्थः । अतः प्रवाहरूपशक्ये विद्यमाना या शक्यता तस्या अवच्छेदकमन्यूनानतिप्रसक्तो धर्मः प्रवाहत्वं एकमेवास्ति । अतः प्रवाहत्वरूपशक्यतावच्छेकस्य एकत्वेन प्रवाहरूपैकर्थनिरूपिता एका एव शक्ति गङ्गा पदे स्वीक्रियते । परन्तु यत्र एकस्य पदस्य अनेके अर्थाः भवन्ति । यथा हरिशब्दस्य विष्णु-वानर-सर्प-भेकादयश्चचतुर्दश अर्थाः कोशे निर्दिष्टाः । तत्र शक्यता चतुर्दशसु शक्येषु-वाच्यार्थेषु संतिष्ठते । शक्यतावच्छेदकं च विष्णुत्व-वानरत्व-सर्पत्व-भेकत्वादिकं चतुर्दश एवञ्च शक्यतावच्छेदकस्य अनेकत्वेन तत्-तत् अर्थनिरूपिताश्चचतुर्दशशक्त्यः हरिशब्देः स्वीक्रियते अस्यां स्थितौ हरिशब्दस्य यस्मिन् अर्थे तात्पर्यग्रहकं संयोगविप्रयोगप्रकरणादिकम् अवतरित हरिशब्दनिष्ठासु शक्तिषु मध्ये प्राकरणिकार्थनिरूपिता सा शक्तिः उद्बुद्धा भवति । एवञ्च उद्बुद्धया तदर्थविषयिण्या शक्त्या तस्य अर्थस्य उपस्थानं भवति, अन्यासां शक्तिनां तिरोधानं च भवति एवञ्च प्रकराणादिना अर्थान्तरविषयकशक्तेः तिरोधानात् अप्राकरणिकस्य अर्थान्तरस्य बोधः अभिधया-शक्त्या तु भवितुं नार्हति । अतः अभिधया बोधयितुम् अशक्यस्य अप्रकारणिकस्य अर्थस्य बोधो यथा शब्दवृत्या भवति सा शब्दवृत्तिः अञ्जना अर्थात् व्यञ्जना इति अवगन्तव्यम् । इयं हि व्यञ्जना अभिधामूलाशाब्दीव्यञ्जना कथ्यते ।

**वाचकत्वनियामकाः संयोगादयः**

**उक्तञ्च काव्यप्रकाशे -**

---

[4]काव्यप्रकाशे - उ.२, का.१९ ।

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः**

**शब्दस्यानवच्छेदे विशेषस्मृतिहेतवः ।।**[5]

**वाचकत्वनियामकाः**

**संयोगः** - सम्पक् योगः प्रसिद्धसम्बन्धः ।

**विप्रयोगः** - प्रसिद्धसम्बन्धध्वंसः, विभागो वा ।

**साहचर्यम्** - एककालदेशावस्थायित्वम् । एकस्मिन् कार्ये परस्पर सापेक्षत्वं वा ।

**विरोधिता** - वध्यघातकत्वं सहानवस्थानं च ।

**अर्थः** - प्रयोजनापरपर्यापमनन्यथा साध्यं फलम् ।

**प्रकरणम्** - वक्तृश्रोतृबुद्धिस्थता ।

**लिङ्गम्** - संयोगातिरिक्तसम्बन्धेन परपक्षव्यावृतो धर्म इति ।

**शब्दस्यान्यस्यसन्निधिः** - समासाद्यनधीनसमानार्थताकशब्दान्तर-समभिव्याहरारः ।

**सामर्थ्यम्** - कारणता ।

**औचिती** - योग्यता ।

**देशकालौ** - तद्विशेषौ ।

**व्यक्तिः** - लिङ्गम् । स्त्रीपुंस्त्वादि ।

**स्वराः** - उदात्तादि । उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः इति ।

शब्दार्थस्य - शब्दवाच्यार्थस्य ।

---

[5] वाक्यपदीये प्रथमकाण्डः ।

अनवच्छेदे - अनिश्चये सति (कतमोऽर्थोऽत्र विवक्षित इति सन्देहे सति) ।

विशेषस्मृतिहेतवः - विशेषस्य विवक्षितार्थस्य या स्मृतिः ज्ञानं तद्हेतवः, तज्जनका भवन्ति इत्यर्थः ।

एते संयोगादयः शब्दवाच्यार्थस्य अनिश्चये सति तदपाकरणद्वारेण विशेषज्ञानजनकाः अर्थात् अर्थविशेषविषयकनिश्चयात्मकज्ञानजनका भवन्ति ।

**संयोगादीनाम् उदाहरणैः सह समन्ववयः**

संयोगादीनां वाचकत्वनियामकतायां क्रमेण उदाहरणानि उच्यन्ते, यथा -

**संयोगः- सशङ्खचक्रो हरिः** अशङ्खचक्रो हरिः इत्युच्यते ।

अत्र यमानिलेन्द्रचन्द्रार्कविष्णुसिंहाशुवाजिषु ।

शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु इति अमरकोशाद् अनेकार्थस्य हरिशब्दस्य वाचकत्वं शङ्खादिसंयोगेन अच्युते विष्णौ नियम्यते ।

**विप्रयोगः - अशङ्खचक्रो हरिः** ।

संयोगपूर्वकत्वात् ध्वंसस्य विष्णोः अन्यत्र शङ्खादिध्वंसाभावात् अशङ्खचक्रः इत्यत्र नञ् पदबोध्वंसेन अनेकार्थस्य हरिशब्दस्य वाचकत्वम् विष्णौ उच्यते - नियम्यते । एवं सत्वसा धेनुः आनीयताम् इति अवत्सा धेनुः आनीयताम् । इति च यथाक्रमं संयोगविप्रयोगयोः उदाहरणम् ।

**साहचर्यम् - रामलक्षणाविति** दाशरथौ ।

**रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे ।**

**राघवे चासिते श्वेते मनोज्ञेऽपि च वाच्यवत् ।।**[6]

इति विश्वकोशात् रामशब्दोऽनेकार्थकः । एवं सारसदुर्योधनपुत्राद्यर्थे प्रसिद्धत्वात् लक्ष्मणशब्दः अपि अनेकार्थः । तथा च अत्र लक्ष्मणसाहचर्यात् रामो न भार्गवादिः । रामसाहचर्यात् च लक्ष्मणो न सारसादिः । किन्तु उभयोः शब्दयोः वाचकत्वं साहचर्येण दाशरथौ नियम्यते ।

---

[6]विश्वकोशः ।

**विरोधिता -** वध्यघातकभावरूपस्य विरोधस्य नियामकत्वम् उदाहरति मम्मटाचार्यः रामार्जुनगतिस्तयोरिति **भार्गवकार्तवीर्ययोः** । अर्जुनविरोधित्वात् रामो भार्गव एव न तु दाशरथ्यादिः । तद्वध्यत्वाच्चार्जुनः कार्तवीर्य एव न पाण्डवादिः ।

**अर्थः -स्थाणुं भज** भवच्छिदे, इति हरे ।

स्थाणुर्वा ना ध्रुवः शङ्कुः इति, स्थाणू रूद्र उमापतिःइति च अमरकोशाद् अनेकार्थस्य स्थाणुशब्दस्य वाचकत्वं वृक्षखण्डाद्यसाध्येन भवच्छेदनरूपेण फलेन हरे शिवे नियम्यते ।

**प्रकरणम् - सर्वं जानाति देव** इति युष्मदर्थे ।

अमरा निर्जरा देवाः इति राजा भट्टारको देवः इति च अमरकोशात् देवो मेधे सुरे राज्ञि इति विश्वकोशात् च राजामरादिरूपानेकार्थकस्य देवशब्दस्य वाचकत्वं राजसम्बोध्यदूतकथारूपेण प्रकरणेन प्रकृत राजानि नियम्यते । राजैवात्र युष्मदर्थः बुद्धिस्थत्वात् ।

**लिङ्गम् - कुपितो मकरध्वज** इति कामे । अत्रायं भावः - संयोगातिरिक्तेनसमवायसम्बन्धेन कोपः नैव मकराकारध्वजे स्थातुमर्हति नापि समुद्रे तयोः अचेतनत्वात् । कोपस्य च समवायसम्बन्धेन चेतने एव विद्यमानत्वात् । एवं रीत्या संयोगोतिरिक्त - समवायसम्बन्धेन ध्वज-समुद्राभ्यां पराभ्यां व्यावृत्तः तयोः अविद्यमानः यः कोषः तदेव लिङ्गम् । तेन कोपरूपेण लिङ्गेन अनेकार्थकस्य मकरध्वजशब्दस्य शक्तिः अभिधा कामे नियम्यते । कोपस्य तस्मिन् एव अर्थे समवायासम्बन्धेन विद्यमानत्वसम्भवात् ।

**देशः - भात्यत्र परमेश्वर** इति राजधानीरूपात् देशात् राजनि विष्णुशिवादौ शक्तत्वेन अनेकार्थकस्य परमेश्वरशब्दस्य वाचकत्वम् अत्रेति राजधानीरूपदेशेन राजनि नियम्यते । विष्णोः शिवस्य वा भानं वैकुण्ठे कैलासे वा । राजधान्यां तु राज्ञ एवेति मनीषायां स्पष्टम् । कमलाकरस्तु अत्र राजधानीशे परमेश्वरो राजा न तु विष्णुः । तस्य सर्वगतत्वात् अत्रेत्यस्य वैयर्थ्यात् इति व्याचक्रे ।

**कालः - चित्रभानुर्विभातीति** दिने रवौ, रात्रौ बह्मौ । चित्रामानवः किरणा यस्येति विग्रहेऽनेकार्थस्य चित्रभानुपदस्य वाचकत्वं, दिने प्रयोगे सति सूर्ये नियम्यते । रात्रौ प्रयोगे सति ब्रह्मौ अग्नौ नियम्यते । तयोस्तत्रैव दीप्तयाधिक्यात् ।

**व्यक्तिः - मित्रं भातीति** सुहृदि, मित्रो भातीति रवौ ।

मित्रं सुहृदि मित्रोऽर्कः इति कोशाद् अनेकार्थकस्य मित्रशब्दस्य वाचकत्वं नपुंसकलिङ्गरूपव्यक्तातया सहृदि पुल्लिङ्गरूपव्यक्त्या रवौ नियम्यते । भातीति पदाच्च लिङ्गनिर्णयः अन्यथा द्वितीयैकवचने पुंस्त्वेऽपि मित्रमिति प्रयोगसम्भवः ।

**स्वरादयः -** इन्द्रशत्रुरित्यादौ वेदे एव, न काव्ये, स्वरो विशेषप्रतीतिकृत् ।

इन्द्रशत्रुरिति पदे इन्द्रः शत्रुः शातयिता (मारयिता) यस्येति बहुव्रीहौ आद्यपदोदात्तत्वम् । तेन च, इन्द्रस्य शातनकर्तृत्वं बोध्यते । इन्द्रस्य शत्रुरिति षष्ठीतत्पुरुषपक्षे, अन्त्यपदोदात्तत्वम् । तेन, इन्द्रस्य शातनकर्मतयावगमः इति । एवञ्च आद्युदात्तस्वरेण इन्द्रशत्रुशब्दस्य शक्तिः शातनकर्तृत्वविशिष्टे इन्द्रे, तथा अन्तोदात्तस्वरेण सा शक्तिः शातनकर्मत्वविशिष्टे इन्द्रे नियम्यते ।

तदेतदुक्तं -

**मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**[7]

अयं च उदात्तादिस्वरः वेदे एव अर्थविशेषे शब्दशक्तिं नियमयति, न तु काव्ये ।

**काव्ये स्वरस्य स्थितिः**

आचार्यमम्मटमते, काव्येषु उदात्तादीनां नार्थविशेषनियामकता इत्यर्थः । ननु काव्येऽपि स्वरोविशेषप्रतीतिकृदस्येव यथा उदात्तादिविषये भरतमुनेः कथनमस्ति -

**उदात्तश्चानुदात्तश्च स्वरितः कम्पिस्तथा ।**

**वर्णाश्चचत्वार एव स्युः पाठ्ययोगे तपोधनाः ।।**[8]

स्वरादयः अत्रत्यादिपदने अभिनयादीनां ग्रहणं बोध्यम् तत्र अभिनयोदाहरणम्

**उक्तञ्च काव्यप्रकाशे -**

**एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।**

**एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ।।**[9]

---

[7]पाणिनीयशिक्षा।

[8]नाट्यशास्त्रम् ।

[9]काव्यप्रकाशः उ.२ ।

http://www.shantiejournal.com/ ISSN :2278-4381

# योगशास्त्रस्य विद्यार्थिजीवने क्रियान्वयस्य विश्लेषणात्मकम् अध्ययनम्

# An analytical study on the implementation of Yogashastra in the lives of students

**Dr. Nehal N. Dave**[1]

**Abstract/सारांशः**

योगशास्त्रस्य श्रवणे सति बहुधा आसनानां, ध्यानस्य च चित्रं मनसि उद्भवति। अधिकाधिकं प्राणायामस्य स्मरणं भवति। परन्तु अष्टाङ्गयोगः इति तु कश्चन विशालः विषयः वर्तते, यः मनुष्याणां सर्वासां समस्यानां समाधानं कर्तुं शक्नोति। मनुष्याणाम् अधिकतमाः समस्याः आधिदैविक्यः न सन्ति, ताः तु आध्यात्मिक्यः, आधिभौतिक्यः च। वास्तव्येन अद्यतनस्य भौतिकजगतःनिर्माता स्वयं मनुष्य एव वर्तते, परन्तु सः स्वस्य मूलाधारं, मूलस्वरूपं चैव विस्मृतवान्। परिणामतः – व्याधयः, आततिः, भारः, विविक्ततता, सामाजिक-समस्या, वियोगभयः, दुःखम्, आक्रामकता, अव्यवस्थितं जीवनं, स्वास्थ्य-समस्या, भावनात्मक-अनाधारः, घृणा, आतङ्कवादः इत्येताः समस्याः मनुष्येण एव उत्पादिताः सन्ति।उक्ताः सर्वाः समस्याः एव मनुष्येषु अन्तःकलहं जनयन्ति। वर्तमाना सन्ततिः अग्रिमायै सन्तत्यै एताः सर्वाःसमस्याःउत्पादितुम् एव ज्ञात्वा, अज्ञात्वा वा प्रशिक्षणं प्रयच्छति। अर्थात् विद्यार्थिकालावधौ एव सर्वासां समस्यानां मूलं दृश्यते, तदेव मूलम् अग्रे वृक्षस्य स्वरूपं धरते इति स्वीकर्तव्यम्। उक्तञ्च –

**"अशक्तिरापदस्तृष्णा मूकता मूढबुद्धिता। गृध्नुता लोलता दैन्यं सर्वं बाल्ये प्रवर्तते॥[2]"**
**"लीलासु दुर्विलासेषु दुरीहासु दुराशये।परमं मोहमाधत्ते बालो बलवदापतन्॥८॥"**
**"विकल्पकल्पितारम्भं दुर्विलारसं दुरास्पदम्। शैशवं शासनायैव पुरुषस्य न शान्तये॥९॥"**
**"दोषा ये दुराचारा दुष्क्रमा ये दुराधयः।ते सर्वे संस्थिता बाल्ये दुर्गर्त इव कौशिकाः॥१०॥[3]"**

अतः एताः समस्याः मूलतः एव ज्ञातव्याः, तासाम् उन्मूलनं च आवश्यकं भवति। विद्यार्थिरूपेण बालः यदि पारम्परिक-समस्यानाम् उन्मूलनाय प्रशिक्षितः भवति, तर्हि पूर्वसन्तत्या अनुवर्तितानां समस्यानां लोपः उत ह्रासः भवेत्। कालान्तरे स्वस्थमानसिकतायुक्ता सन्ततिः उत्तरोत्तरं वर्धते।

प्रतिदिनस्य जीवने योगस्य विविधानां सिद्धान्तानां पालनेन विद्यार्थिनः शारीरिकक्षमतायां, मानसिकक्षमतायाम्, आध्यात्मिकक्षमतायां च वृद्धिः भवति। कश्चन विद्यार्थी यदि परिस्थित्यनुसारं केनचित् मनोविकारेण ग्रसितः अस्ति, तर्हि योगशास्त्रे वर्णितानां लक्षणानाम् आधारेण सः आत्ममूल्याङ्कनं कर्तुं शक्नोति, ततश्च योगशास्त्रस्य उपयोगस्य अनुसारं निदानम् अपि प्राप्नोति। न केवलं विषयं प्रति परन्तु सम्पूर्ण-अध्ययन-पद्धतिं प्रति तस्य दृष्टकोणः यौगिक-दृष्टिकोणः भवति चेत्, तस्य सम्पूर्णं शैक्षणिक-प्रदर्शनम् उत्कर्षितं भवति। वर्तमान-युगे योगस्य महत्त्वम् अतीव स्पष्टतया द्रष्टुं शक्यते, अतः न केवलम् अध्ययने अपि तु जीवने अपि विविधस्तरे योगस्य सिद्धान्तानाम् उपयोगः आगम्यमानानां समस्यानां समाधानाय अतीव आवश्यकः भवति। अतः एतस्मिन् शोधपत्रे योगशास्त्रस्य विविधाः सिद्धान्ताः अपि कथं जीवने क्रियान्विताः करणीयाः इति उपस्थाप्यते। विद्यार्थिनः सर्वाङ्गिणं विकासं साधयितुं योगशास्त्रं योग्यं मार्गदर्शनं तु करोति, परन्तु योग्यस्य नागरिकस्य रचनायाम् अपि आमूलचूलं सहयोगं प्रयच्छति।

[1]M.A., M.Phil. Ph.D. Assi. Prof. atLakulish Yoga University, Ahmedabad, Gujarat.nehaldca08@gmail.com, 9427164478

[2]वाल्मीकिः, योगवाशिष्ठः, वैराग्यप्रकरणम्, सर्गः – १९, श्लो. २ *vasiṣṭhaḥ, yogavāśiṣṭhaḥ, vairāgyaprakaraṇam, sargaḥ – 19, ślo. 2*

[3]तत्रैव, श्लो. ८-१०ibdi, *ślo. 2.10*

आवर्षम् अनावश्यक-अध्ययन-दृष्टकोणस्य अनुसरणत्वात् विशेषतया परीक्षाकाले विद्यार्थिनः व्यवहारः अतीव भिन्नः भवति। परीक्षाकाले विद्यार्थिनि निम्नलक्षणानि सामान्यतया दृश्यन्ते। १) अज्ञातं प्रति चिन्ता। २) मनसि भयस्य, अस्थिरतायाः च भावना। ३) अनियन्त्रिताः, आसक्ताः च विचाराः। ४) दुस्स्वप्नानि। ५) अनिद्रा। ६) हृदयस्य गतौ वर्धनम्। परन्तु अध्ययनक्षेत्रस्य, समाजस्य च उक्तानां सर्वासां समस्यानाम् उन्मूलनस्य उपायः योगशास्त्रे निश्चयेन प्राप्यते, अतः विश्लेषणात्मकं शोधपत्रमिदम् उपस्थाप्यते।

**Keywords/मुख्यशब्दाः – योगशास्त्रस्य विद्यार्थिनां जीवने क्रियान्वयनम्, योग का विद्यार्थीओं पर क्रियान्वय, विद्यार्थीओं के लिये योग, विद्यार्थीओं की मनोवैज्ञानिक समस्याएँ, योग अनुसार दिनचर्या,Implementation of Yoga on students, Yoga for students, Psychological problems of students, Daily routine according to Yoga**

**Purpose/शोधोद्देश्यम्** – एतस्य संशोधनस्य उद्देश्यं ज्ञानविकासस्य वर्तते।

- विविधयोग-प्रकाराणां विद्यार्थिजीवने क्रियान्वयनात् लाभः भवेत्।
- विद्यार्थिनां शैक्षणिक-गतिविधौ एकाग्रतायाः अभावस्य समाधानप्राप्तिः भवेत्।
- विद्यार्थिनां मनोविकाराणां विषये योगशास्त्रात् अन्वेषणं भवेत्।
- योगे विद्यमानानां विचाराणाम् आधारेण मनोविकारस्य निदानं भवेत्।
- अध्ययन-गतिविधौ यौगिक-दृष्टिकोणप्रदानं भवेत्।
- योगस्य विविधानां सिद्धान्तानां विद्यार्थि-अवस्थायां क्रियान्वयनं भवेत्।
- विद्यार्थिनां यौगिक-दैनन्दिन्याः विकसनं भवेत्।

**Type of Research/शोधप्रकारः** – एतत् विश्लेषणात्मकम् अनुसन्धानम् अस्ति, यतः एतस्मात् शोधपत्रात् उत्पन्न-परिणामानां प्रयोगात्मकतया उत व्यवहारात्मकतया उपयोगः शक्यते। एतस्मिन् शोधपत्रे बालेभ्यः कीदृशः योगः सङ्गतः भवति, बालेषु मनोविकारसम्बद्धानां समस्यानां किं समाधानं भवेत्, बालानां जीवने योगः किं परिवर्तनम् आनेतुं शक्नोति इत्यादीनां विषयाणां विश्लेषणात्मक-प्रकारस्य अध्ययनं क्रियते।

**Preface/प्रस्तावना –**

"यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि॥"[4] इत्यनेन सूत्रेण योगस्य अष्टाङ्गानि उक्तानि। तेषां योगाङ्गानाम् उद्देश्यं किमितिप्रश्ने जाते सति "योगाङ्गाऽनुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥"[5] इति सूत्रं ज्ञातव्यम्। अर्थात् अष्टाङ्गयोगस्य अनुष्ठानमात्रेण क्लेशरूपा अशुद्धिः दूरे भवति, तत्त्वज्ञानञ्च प्राप्यते इति। अविद्यानाशस्य, कैवल्यप्राप्तेः च उपायत्वेन भगवान् पतञ्जलिः अविप्लवायाः विवेकख्यातेः निरूपणम् अकरोत्।[6] अतः स्पष्टम् अस्ति यत्, अष्टाङ्गयोगः क्लेशरूपाज्ञानस्य निवृत्त्यै, हानस्य[78] प्राप्त्यै च आवश्यकः इति। यौगिकक्षेत्रात् बहिः अर्थात् व्यावहारिके जीवनेऽपि याः क्लेशरूपाः

[4]पातञ्जलयोगसूत्रम्, २ – साधनपादः, सूत्रम् – २९*pātañjalayogasūtram, 2 – sādhanapādaḥ, sūtram - 29*

[5]तत्रैव, सूत्रम् – २८ibdi, *sūtram - 28*

[6]तत्रैव, सूत्रम् – २६ –*sūtram - 26* विवेकख्यातिरविप्लवा हानोपायः॥

[7]तस्यादर्शनस्याभावादबुद्धिपुरुषसंयोगाभाव आत्यन्तिको बन्धनोपरम इत्यर्थः। एतद्धानम्। तद्दृशेः कैवल्यं पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः। - व्यासभाष्यम्, सूत्रं – २५*vyāsabhāṣyam, sūtraṁ - 25*

[8]तस्या अविद्यायाः स्वरूपविरुद्धेन सम्यग्ज्ञानेनोन्मूलिताया योऽयमभावस्तस्मिन्सति तत्कार्यस्य संयोगस्याप्यभावस्तद्धानमित्युच्यते। - भोजवृत्तिः, सूत्रं –

अविद्याः सन्ति, ताभ्यः उत्पन्नानां दुःखानां निवृत्तिः अष्टाङ्गयोगस्य अभ्यासेन भवितुम् अर्हति। एतस्याः पृष्ठभूमेः आलोके एव विद्यार्थिनः जीवने उत्पन्नस्य अज्ञानस्य निवृत्तिः कथं भवति, हानस्य प्राप्तिः कथं भवति च इति ज्ञातव्यं भवति। अष्टाङ्गयोगस्य दैनिकजीवने क्रियान्वयनाय विद्यार्थी अष्टाङ्गयोगस्य आचरणं कुर्यात्। अतः सर्वप्रथमं सः सन्ध्याकाले प्राणायामानां नियमिततया अभ्यासं कुर्यात्। उक्तञ्च –

**"प्रातर्मध्यन्दिने सायमर्धरात्रे च कुम्भकान्। शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्॥[9]"**

सूर्योदयकाले – ५:४० तः ६:२० पर्यन्तं, मध्याह्नकाले – ११:४० तः १२:२० पर्यन्तं, सायङ्काले – ५:४० तः ६:२० पर्यन्तं, मध्यरात्रौ – ११:४० तः १२:४० पर्यन्तं कुम्भकानाम् अभ्यासं विद्यार्थी कुर्यात्। प्राणायामस्य अभ्यासेन मनसः, शरीराभ्यान्तरस्य च मलानाम् उन्मूलनं भवति।[10] प्राणायामेन सात्त्विकतायाः सञ्चारः भवति, यः दैनिकक्रियासु अतीव महत्त्वपूर्णां भूमिकां भजते। परन्तु प्राणायामस्य अभ्यासाय शौचस्य, तपसः च आवश्यकता भवति, ये पञ्चनियमेषु[11] अन्तर्भवतः।[12] त्रिप्रकारक-शौचेषु बौद्धिकशौचेन सः कुविचाराणां त्यागं कृत्वा स्वबुद्धिं प्राणायामाय प्रेरयितुं शक्नोति। अत्र कुविचाराः इत्युक्ते प्रातः शीघ्रजागरणेन कः लाभः?, ह्यः रात्रौ अतीव विलम्बः जातोऽतः अधिकं शयनं करोमि, १० निमेषान् यावत् अधिकं शयनं कृत्वा जागरणं करोमि, अहम् अलसः अस्म्यतः अद्य जागरणं करोमि चेदपि प्रतिदिनं तु कर्तुं न शक्नोमि इति। त्रिप्रकारक-तपस्सु बौद्धिक-तपसा सः निद्रायाः त्यागं कर्तुं शक्नोति। यतः अलसरूपायाः मानसः दुर्वृत्तेः निग्रहणं सः सद्विचारैः कर्तुं शक्नोति। यथा – आदिनम् अहं यत्किमपि करोमि, तस्य आरम्भः पर्यङ्कत्यागेन भवति, अतःपर्यङ्कत्यागरूपः दिनस्य प्रथमः निर्णयः स्वजीवनोत्कर्षं प्रति मम दृढसङ्कल्पस्य परिचायकः अस्ति, अतः मया कुविचाराणां त्यागेन नित्यक्रिया आरम्भणीया एव इति। बौद्धिक-शौच-तपसी प्रातः उत आदिनं सात्त्विकवृत्तीनां सञ्चाराय साहाय्यं कुरुतः। अनेन ईश्वरप्रणिधानस्य, स्वाध्यायस्य च आचरणे साहाय्यं भवति।

यदा विद्यार्थी प्रातः उत्थाय प्राणायामादीनाम् अनन्तरम् आदिनम् ईश्वरप्रणिधानस्य नियमम् अनुसर्तुं सङ्कल्पं करोति, तदा सः सर्वकार्येषु उत्साहितः भवति। उत्साहस्तु योगसाधकतत्त्वेषु अन्तर्भवति।[13] अत्र एव सः ध्यानं कृत्वा स्वमनः सुस्थिरं कुर्यात्। ईश्वरप्रणिधानस्य समनन्तरं सः आसनादीनाम्[14] अभ्यासेन स्वशरीरस्य क्लान्तिम् अपहृत्य शारीरिकीं, मानसिकीं च स्थिरतां सुनिश्चयेत्।[15] ततः बाह्य-शौचस्य अनुपालनोत्तरं स्वाध्यायाय मनः सज्जीभवति। योगिनां कृते ॐ कारस्य, विविधमन्त्राणां च मननं स्वाध्यायः भवति। परन्तु विद्यार्थिनः जीवने अध्ययन-विषयाणां मननम् एव स्वाध्यायः। अतः सः मनोनिग्रहपूर्वकं स्वाध्यायस्य आचरणं कुर्यात्।

प्रातः स्वाध्यायोत्तरं विद्यार्थी बहुधा पठनाय विद्यालयादिकं शैक्षणिकं परिसरं गच्छति। सद्यः विद्यार्थी कक्ष्यायां ध्यानं दातुं न शक्नोति। यतः सः गृहात् दूरे बस-द्विचक्रिका-संस्थायानैः परिसरं प्राप्नोति। गृहात् शालां यावत् तस्य सम्मुखम् अनेके विषयाः

---

२५*bhojavṛttiḥ, sūtraṁ - 25*

[9] स्वात्मारामविरचिताहठप्रदीपिका, द्वितीयः उपदेशः, श्लो. ११*svātmārāmaviracitā haṭhapradīpikā, dvitīyaḥ upadeśaḥ, ślo. 11*

[10]प्राणायामैरेव सर्वे प्रशुष्यन्ति मला इति। - स्वात्मारामविरचिताहठप्रदीपिका, द्वितीयः उपदेशः, श्लो. ३८*svātmārāmaviracitā haṭhapradīpikā, dvitīyaḥ upadeśaḥ, ślo. 38*

[11]पातञ्जलयोगसूत्रम्, २ – साधनपादः, सूत्रं – ३०*pātañjalayogasūtram, 2 – sādhanapādaḥ, sūtraṁ – 30* - अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहा यमाः॥

[12]तत्रैव, सूत्रम् – ३२ – ibid,*sūtraṁ – 32*शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि नियमाः॥

[13]उत्साहात् साहातसात् धैर्यात् तत्त्वज्ञानाच्च निश्चयात्।
जनसङ्गपरित्यागात् षड्भिर्योगः प्रसिद्ध्यति॥ - स्वात्मारामविरचिताहठप्रदीपिका, प्रथमः उपदेशः, श्लो. १६*svātmārāmaviracitā haṭhapradīpikā, prathamaḥ upadeśaḥ, ślo. 16*

[14]स्वस्तिक-गोमुख-वीराः, कूर्म-कुक्कूट-उत्तान-धनुंषि।
मत्स्येन्द्र-पश्चिमतानौ, मयूर-शव-सिद्ध-पद्म-भद्राः॥ - बालबोधाय स्वनिर्मितः श्लोकः। (योगप्रदीपिकायाः आसनानानि) The shloka is made by me.

[15]कुर्यात्तदासनं स्थैर्यमारोग्यं चाङ्गलाघवम्॥ - स्वात्मारामविरचिताहठप्रदीपिका, प्रथमः उपदेशः, श्लो. १७*svātmārāmaviracitā haṭhapradīpikā, prathamaḥ upadeśaḥ, ślo. 17*

समुपस्थिताः भवन्ति, ततोऽधिकं गमनागमने तस्य अनावश्यकः श्रमः अपि भवति, यः तस्य शारीरिकीं, मानसिकीं च क्षमतां हरति। यानारूढः सः अध्ययनं विहाय सर्वत्र ध्यानं ददाति, येन अध्ययनकाले कक्षायां सः एकाग्रः न भवति उत तस्य एकाग्रतायां न्यूनता दरीदृश्यते। उक्तञ्च –

**"अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति॥[16]"**

**"वर्जयेद्दुर्जनप्रान्तं वह्निस्त्रीपथिसेवनम्। प्रातःस्नानोपवासादि कार्यक्लेशविधिं तथा॥[17]"**

अतः विद्यार्थी अकरणीयानि सर्वाणि कार्याणि त्यक्त्वा दृढमनः कक्षायाम् उपस्थितः स्यात्। एतस्य कृते सः प्रत्याहारस्य[18] अपि अभ्यासं कुर्यात्। यतः इन्द्रियाणां स्वविषयेभ्यः विच्छेदे सति चित्तस्य स्वरूपानुकरणं प्रत्याहारः उच्यते। उक्तञ्च –

**"पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ्पश्यति नान्तरात्मन्।"**

**"कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥[19]"**

गृहात् शैक्षणिकपरिसरे दूरे सत्यपि विद्यार्थी यथाशक्तिः योगबाधकतत्त्वेभ्यः दौर्यं स्थापयेत्। मार्गे अध्ययनचिन्तनं, नामजपः, पुनरावर्तनं, मानसिकशौचं च कुर्वन् स्वबुद्धिं स्थिराम् एव स्थापयेत्। रूप-रस-गन्ध-शब्द-स्पर्शाः इन्द्रियाणां भोजनं भवन्ति, अतः इन्द्रियेभ्यः भोजनम् अदत्त्वा मार्गे सः सततं प्रत्याहारस्य आचरणं कुर्यात्। परिणामतः कक्षायां तस्य एकाग्रता, उत्साहः, धैर्यञ्च वर्धते। एकवारं कक्षायां विद्यार्थी स्थिरो भवति, ततः गृहकार्ये अपि तस्य गतिः आवश्यकी भवति। यतः गृहकार्यादीनाम् अभ्यासेन विद्यार्थी अध्ययनविषये विस्तारेण चिन्तनं कर्तुं, क्रियान्वयनं च कर्तुं शक्नोति। गृहकार्ये धारणायाः[20] अभ्यासः साहाय्यं करोति। कस्मिन्नपि विषये चित्तस्य स्थिरीकरणं धारणा भवति।योगाभ्यासः यथा आवश्यकः, तथैव अध्ययने अभ्यासः अपि आवश्यकः भवति।[21] सद्यः गृहकार्यम् इत्युक्ते किमपि लिखित्वा उत स्मृत्वा गन्तव्यम्। परन्तु वास्तव्येन गृहकार्यं तु काक्षायां पठितस्य विषयस्यअधिकगभीरतया आलोडनं (stirring) भवति। महाविद्यालयोत्तरं विद्यार्थी युवावस्थायां चञ्चलायते। अतः तस्य अध्ययनभिन्नाः प्रजल्पाः अत्यधिकाः भवन्ति। एवं कक्षायां, गृहकार्ये, समनुदेशिते (assignment), कार्यशालायां च तस्य प्रगतिः अवरुद्धा भवति। तस्य प्रभावः अध्ययनविषयस्य आलोडने भवति। अन्ते सः मनोविकाराणां बीजानि जनयति।परन्तु अष्टाङ्गयोगस्य अभ्यासेन विद्यार्थी स्वविनाशं नाशयति। उक्तञ्च –**"महानरकबीजेन सन्ततभ्रमदायिना। यौवनेन न ये नष्टा नष्टा नान्येन ते जनाः॥[22]"**

मनोविकाराः विद्यार्थिनं पूर्णतया नाशयितुं शक्नुवन्ति। पश्चात् तस्य पार्श्वे "I quit" इति वचनम् एव अवशिष्टं भवति उत सर्वदा अवसादग्रस्तः अटति। तस्य अवसादस्य अवस्थायां सः अधिकाधिकम् अकरणीयानि कार्याणि करोति।अन्ते स्वस्य, परिवारस्य, समाजस्य च कृते सः दुःखकारणं भवति। परीक्षावसरे तस्य विकाराः आकाशचुम्बिताः भवन्ति। ते विकाराः प्रत्यक्षाः एव भवन्ति। यथा उक्तं पातञ्जलयोगप्रदीपे –

---

[16]स्वात्मारामविरचिताहठप्रदीपिका, प्रथमः उपदेशः, श्लो. १५*svātmārāmaviracitā haṭhapradīpikā, prathamaḥ upadeśaḥ, ślo. 15*

[17]स्वात्मारामविरचिताहठप्रदीपिका, प्रथमः उपदेशः, श्लो. ६२*svātmārāmaviracitā haṭhapradīpikā, prathamaḥ upadeśaḥ, ślo. 60*

[18]पातञ्जलयोगसूत्रम्, २ – साधनपादः, सूत्रं – ५४*pātañjalayogasūtram, 2 – sādhanapādaḥ, sūtraṁ – 54* - स्वविषयसम्प्रयोगे चित्तस्वरुपानुकार इवेन्द्रियाणां प्रत्याहारः॥

[19]कठोपनिषद् – २/१/१*kaṭhopaniṣad – 2/1/1*

[20]पातञ्जलयोगसूत्रम्, ३ – विभूतिपादः, सूत्रं – १*pātañjalayogasūtram, 3 – vibhūtipādaḥ, sūtraṁ – 1* - देशबन्धश्चित्तस्य धारणा॥

[21]क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत्।
न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते। - स्वात्मारामविरचिताहठप्रदीपिका, प्रथमः उपदेशः, श्लो. ६५*svātmārāmaviracitā haṭhapradīpikā, prathamaḥ upadeśaḥ, ślo. 65*

[22]योगवासिष्ठः – वैराग्यप्रकरणम् – सर्गः – २०, श्लो. ६*yogavāsiṣṭhaḥ – vairāgyaprakaraṇam – sargaḥ – 20, ślo. 6*

**"व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः॥""दुःख-दौर्मनस्य-अङ्गमेजयत्व-श्वास-प्रश्वासा विक्षेपसहभुवः॥[23]"**

दृश्यतां स्वं परितः हसन् क्रीडन् गच्छन् विद्यार्थी अपि एकान्ते आत्मानम् उत्कैः मनोविकारैः ग्रस्तम् अनुभवति। ते विकाराः तस्य अध्ययनकार्ये विघ्नान् जयन्ति। अतः सः कदाऽपि वास्तविकाध्ययनं कर्तुं न प्रभवति।[24] अन्ते सः प्रतिकृतिं (copy and paste), चौर्यं, कार्यलोपं च करोति। प्राथमिकशिक्षणाद् आरभ्य विद्यावारिधिं (Ph.D.) यावत्एषा शृङ्खला गच्छति, कथञ्चित् आजीविका प्राप्यते, परन्तु तत्राऽपि मनोविकारग्रस्तत्वात् प्रतिकृति-आदियुक्तम् एव जीवनं भवति। यदा जनः स्वमनसा किमपि न रचयति, तदा सः क्लान्तः, जामितः, अविविकी च भवति। धनं तस्मै सुखं ददाति, परन्तु एकान्ते तु सः उत्कैः मनोविकारैः ग्रस्तः सन् आत्मग्लानिम् अनुभवति। शनैः शनैः सः परिवारात्, समाजाच्च अपि दूरे भवति। क्रीडायां, कलायां, रचनात्मकतायां च तस्य रुचिः न भवति। अन्ते मानसिकपरितापात् रक्षणाय मनोरञ्जनत्वेन सः व्यर्थस्थानेषु (Youtube, FB, Twitter, Netflix, TV) समयं नाशयति, यतः वास्तविकं मनोरञ्जनं किम् इति तस्य ज्ञानं न भवति। एवं विद्यार्थि-अवस्थायां जातं दोषं सः आजीवनम् उद्वहति। परिणामतः चौर्य-वञ्चना-लुण्ठनादिकम् (प्रत्यक्षपरोक्षतया) आचरति।[25]

विद्यार्थी जन्मतः योगदर्शनस्य, आयुर्वेदस्य, वेदान्तस्य च ज्ञाता न भवति, ततोऽधिकं सः बहुधा आजीवनम् एतेषां विषयाणाम् अध्ययनं न प्राप्नोति। गृहस्थाश्रमे सः स्वस्य एव जीवनं स्वापत्याय प्रयच्छति, एवम् एषा शृङ्खला न कदाऽपि भग्ना भवति। परन्तु शिक्षकः, अभिभावकाः च मिलित्वा विद्यार्थिनः जीवने वास्तविक-जीवनशैलीं, पठनशैलीं, विचारशैलीं च स्थापयितुं शक्नुवन्ति, येन स्वजीवने अनुभूताः मनोविकाराः अग्रिमसन्तत्याः जीवने स्थानान्तरिताः न भवेयुः। एतावत् पठित्वा पाठकः (अभिभावकः, शिक्षकः वा) चिन्तयेत् यत्, अहं मम अपत्याय/विद्यार्थिने योगयुक्तं जीवनं दातुं प्रयत्नं करिष्यामि इति। परन्तु अत्र समस्या अस्ति, प्रप्रथमं भवता ज्ञातव्यं भवति यत्, स्वास्थ्यकरी दिनचर्या, जीवनचर्या च कीदृशी भवति इति। अनेके शिक्षकाः सन्ति, ये सज्जतां विना एव कक्षां गच्छन्ति, ततः ते अनर्गलं पाठयित्वा कक्षां समापयन्ति। अनेके अभिभावकाः सन्ति, ये स्वयं तु T.V., दूरभाषे च व्यस्ताः भवन्ति, परन्तु तस्मिन्नेव प्रकोष्ठे स्थितिं बालं पठितुम् आग्रहं कुर्वन्ति।[26] उभयत्रापि विद्यार्थिनः अध्ययनानुकूलता न भवति। अतः विद्यार्थिनः जीवने योगयुक्तस्य जीवनस्य विकसनात् प्राक् शिक्षक-अभिभावकाः स्वजीवने योगयुक्तां जीवनशैलीम् आत्मसात् कुर्युः। योगशास्त्रे सुष्ठु भोजनस्य अतीव महत्त्वं प्रदर्शितम् अस्ति। अतः स्वयं दिनचर्यायाः आरभ्य भोजनस्य, विचारस्य, आचरणस्य च विषये जागरूकाः भवेयुः। प्लास्टिक-पेकेट-पूरितं, मेंदा-युक्तं,बहिरात् आनीतं च भोजनं न कारणीयम्। उक्तञ्च –

**"भोजनमहितं विद्यात् पुनरप्युष्णीकृतं रूक्षम्। अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम्॥[27]"**

प्रातः ऊष्णजलपानं, योगाभ्यासः, सद्विचाराय सत्पुस्तकानां पठनं च विद्यार्थिनः जीवनशैल्यां स्थापनीयं भवति। तस्मै योग्यवातावरणं प्रदातुं योग्यजनानां सम्पर्कः करणीयः भवति, येन विद्यार्थी यम-नियमादीनां योग्यतया पालनं कर्तुं वातावरणं प्राप्नुयात्। विद्यार्थिने रुचिकरं सत्पुस्तकम् आकाशात् न पतति, तस्य कृते बालभोग्य-पुस्तकानाम् आलोडनं स्वयं करणीयं भवति। अभिभावकैः मासत्रये एकवारं गौणशैक्षणिकप्रवासस्य आयोजनं करणीयं, यत्र विद्यार्थी प्रकृतिना, स्वनगरेण, स्वराज्येन, स्वदेशेन च सह तादात्म्यं स्थापयितुं शक्नुयात्। एतादृशी योगयुक्ता दिनचर्या, जीवनशैली च निश्चयेन विद्यार्थिनः अध्ययने साहाय्यं करोति।

---

